दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लतृतीया
श्रावण 02 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-266 | 1 | जुलाई 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचले सी.बी.एस.ई.विद्यालयेषु शिक्षकाणां नियुक्तौ समाप्तः भविष्यति गतिरोधः, २० जुलाई दिनाङ्के महतः निर्णयस्य आशा

3 तिरुपतिमन्दिरे दानस्य नूतनः कीर्तिमानः; एकेनैव दिनेन ९७ कोटिरूप्यकाणां समर्पणम्

4 फीफा-विश्वकप-उपान्त्यक्रीडा: अर्जेन्टीना-देशेन इङ्ग्लैण्डं २-१ इत्यनेन पराजित्य अन्तिमचरणे (फाइनल्) प्रवेशः प्राप्तः

## नवमकक्षायां तृतीय-भाषायाः नवीनः भारः छात्रेषु न आरोपणीयः-सर्वोच्चन्यायालयः

हिमसंस्कृतवार्ता। सर्वोच्चन्यायालयः केन्द्रीय माध्यमिक-शिक्षा-परिषदः पाठ्यक्रमान्तर्गतं नवमकक्षायां तृतीय-भाषायाः समावेशं प्रति महतीं चिन्तां प्रकटितवान्। न्यायालयेन सप्रश्रयं अवलोकितं यत् एतेन नवमश्रेण्याः कोमलमति-छात्रेषु मानसिक-भारः नितरां वर्धिष्यते। न्यायालयेन श्लाघनीयो परामर्शः दत्तः यत् इयं भाषा पञ्चमकक्षायां षष्ठकक्षायां वा प्रवर्धनीया, येन छात्राः सुलभतया तां ग्रहीतुं समर्थाः स्युः। न्यायाधीशयोः बी. वी. नागरत्नायाः आर. महादेवनस्य खण्डपीठेन केन्द्रप्रशासनं प्रति मौखिकरूपेण आदिष्टं यत् नवमकक्षायां तृतीय-भाषायाः नवीनः भारः छात्रेषु न आरोपणीयः।

## देहली-न्यायालयः मानव जीवनं अत्यन्तम् अमूल्यं वर्तते इति तथ्यं सविशेषं प्रतिपाद्य, सामाजिक-कार्यकर्तुः सोनम वाङ्गचुकस्य स्वास्थ्यस्य प्रतिदिनं सूक्ष्म निरीक्षणं विधातुमादिष्टवान्

हिमसंस्कृतवार्ता। देहली-उच्च न्यायालयः मानव जीवनं अत्यन्तं अमूल्यं वर्तते इति तथ्यं सविशेषं प्रतिपाद्य, सामाजिक-कार्यकर्तुः सोनम वाङ्गचुकस्य स्वास्थ्यस्य प्रतिदिनं सूक्ष्म निरीक्षणं विधातुं सम्बद्ध-अधिकारिणः समादिशत। श्रीवाङ्गचुकः सम्प्रति नवदेहल्याः 'जन्तर-मन्तर' प्राङ्गणे अनिश्चितकालं यावत् अनशने निरतो वर्तते। मुख्य-न्यायाधीशस्य डी. के. उपाध्यायस्य अथ न्यायाधीशस्य तेजस-कारिया इत्यस्य खण्डपीठाभ्यां दृढं व्याहृतं यत् प्रशासनीय चिकित्सकैः श्रीवाङ्गचुकस्य स्वास्थ्य-स्थितेः नियमितरूपेण परीक्षणं करणीयम्। केन्द्रप्रशासनस्य देहली-प्रशासनस्य च पक्षतः उपस्थापितः महा-अधिवक्ता तुषार मेहता न्यायपीठस्य पुरतः न्यवेदयत् यत् प्रत्येकस्य नागरिकस्य जीवनं देशाय बहुमूल्यं वर्तते, अतः वाङ्गचुकस्य नियमित-चिकित्सकीय-परीक्षणे प्रशासनस्य काऽपि विप्रतिपत्तिः नास्ति, अपितु पूर्ण-सहमतिः अस्ति।

## नवदेहल्यां बिम्सटेक-देशानां राष्ट्रिय-सुरक्षा-प्रमुखाणां पञ्चमं सम्मेलनं सम्बोधितवान् अजितडोभालः



हिमसंस्कृतवार्ता। भारतस्य राष्ट्रिय-सुरक्षा-परामर्शकः अजित डोभालः वैश्विक भूराजनैतिक-सङ्घर्षावधौ सुरक्षा-समाह्वानानां सम्मुखीकरणाय दृढ-क्षेत्रीय-सहयोगस्य अनिवार्यतां प्रत्यपादयत्। तेन सबलं प्रोदीरितं यत् बिम्सटेक-सदस्य-राष्ट्रैः परस्पर-कल्याणाय एकीभूय सङ्कल्पाः करणीयाः। सः नवदेहल्यां समुपस्थितानां बिम्सटेक-देशानां राष्ट्रिय-सुरक्षा-प्रमुखाणां पञ्चमं सम्मेलनं सम्बोधयन् आसीत्। श्रीडोभालेन स्पष्टीकृतं यत् सम्प्रति समग्रं जगत् विविध-सङ्घर्षैः भूराजनैतिक अनिश्चितताभिः च ग्रसितं वर्तते। तेन वैश्विक आपूर्ति-शृङ्खलासु विघ्न-निवारणाय आर्थिक-आह्वानानां निराकरणार्थं च बिम्सटेक-सदस्य-देशानां मध्ये सहयोगस्य आवश्यकता समुपस्थापिता।

## ओडिशाराज्ये विश्वप्रसिद्धा भगवतः जगन्नाथस्य रथयात्रा आध्यात्मिकोत्साहेन समारब्धा



हिमसंस्कृतवार्ता। ओडिशाराज्यस्य पवित्रायां पुरी-नगर्यां उत्कृष्टाध्यात्मिकोत्साहः वरीवर्ति । विश्वप्रसिद्धा भगवतः जगन्नाथस्य रथयात्रा धार्मिक-विधि-विधानैः अभूतपूर्व-सुरक्षा प्रबन्धैः च सह महता आध्यात्मिकोत्साहेन समारब्धा । गतप्रातःकालादेव तीर्थ-नगर्यां निरन्तरं जायमानां वृष्टिमतीत्य, लक्षाधिकाः श्रद्धालवः अविचलित-श्रद्धया मुख्यमार्गे एतत् पवित्रं दृश्यं साक्षात्कर्तुं उपस्थिताः । जय जगन्नाथ इत्याख्यैः गगनभेदी-जयघोषैः सह भगवान् जगन्नाथः, भगवान् बलभद्रः, देवी सुभद्रा, भगवान् सुदर्शनश्च पूर्ण-विध्यनुसारं स्व-स्व-रथेषु विराजिताः, अनेनैव सह पारम्परिकः पहाण्डी-बिजे इत्ययं कार्यक्रमः सम्पन्नः। अस्य विश्वप्रसिद्ध-महोत्सवस्य सुचारु-सुरक्षित-सञ्चालनाय सार्वत्रिकी सुरक्षा-व्यवस्था, जन-सम्मर्द-प्रबन्धनं सहैव आपत्कालीन-सज्जाः पूर्णरूपेण विहिताः ।

### द्रौपदीमुर्मुः उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र-मोदी च देशवासिभ्यः हार्दान् शुभाशयान् प्रकटितवन्तः

ओडिशाराज्यस्य पुरी-नगरे भगवतः जगन्नाथस्य पावनी रथयात्रा समाचर्यते। अस्मिन् पुण्यावसरे राष्ट्रपतिपदासीना द्रौपदीमुर्मुः उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र-मोदी च देशवासिभ्यः हार्दान् शुभाशयान् प्रकटितवन्तः। अवसरेऽस्मिन् एकस्मिन् सन्देशे राष्ट्रपति-महोदया स्वबाल्य-कालस्य संस्मरणानि प्रस्तुतवती । उपराष्ट्रपतिना प्रतिपादितं यत्, इयं पावन-रथयात्रा श्रद्धा-भक्ति-समानता-सामूहिक सद्भावानां मूल्यानि प्रदर्शयति । प्रधानमन्त्रिणा नरेन्द्रमोदिनापि अवसरेऽस्मिन् निगदितं यत् इयं रथयात्रा देशस्य शाश्वत-आध्यात्मिक-सांस्कृतिक-न्यायसस्य कश्चन प्रकाशमानः चिह्नो वर्तते

## सुभाषितम्

**अचिन्तितानि दुःखानि,**
**यथैवायान्ति देहिनाम्।**
**सुखान्यपि तथा मन्ये,**
**दैवमत्रातिरिच्यते॥**
**(हितोपदेश, मित्रलाभ- १६६)**

अर्थात्- जैसे देहधारियों को अनायास दुःख मिलते हैं वैसे ही सुख भी मिलते हैं, परन्तु इसमें प्रारब्ध बलवान् है ऐसा मेरा मत है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## जापान-ओपन-बैडमिंटन्: पी.वी. सिन्धुः क्वार्टर-फाइनल-चरणे प्रविष्टा; तनीशा-ध्रुवयोः युग्लं पराजितम्

द्विवारं ओलम्पिक-पदकविजेत्री पी.वी. सिन्धुः जापान-ओपन-सुपर-बैडमिंटन्-प्रतियोगितायाः क्वार्टर-फाइनल-चरणं प्रविष्टा अस्ति। सा विश्वस्य पञ्चमक्रमाङ्कस्य क्रीडिकां चीनदेशस्य 'हान यू' इत्येतां सीधे-सेट्स् मध्ये पराजित्य ऋतोः (सीजन) सर्वश्रेष्ठं प्रदर्शनं कृतवती। पी.वी. सिन्धुः केवलं ३५ निमेषेषु २१-१६, २१-१४ इत्यनेन अङ्केनोत्तमं विजयं प्राप्तवती। अपरतः, प्री-क्वार्टर-फाइनल-चरणे तनीशा क्रास्टो-ध्रुव कपिला इत्यनयोः मिश्रित-युगल पराजयस्य सम्मुखं कृतवान्। शीर्षवरीयताप्राप्ता चीनदेशस्य 'फेंग यान झे' तथा 'हुआंग डोंग पिंग' इत्यनयोः जोडी ४७ निमेषेषु भारतीयजोडीं २२-२०, २१-१७ इत्यनेन अन्तरेण पराजितवती।

# हिमाचले सी.बी.एस.ई.विद्यालयेषु शिक्षकाणां नियुक्तौ समाप्तः भविष्यति गतिरोधः, २० जुलाई दिनाङ्के महतः निर्णयस्य आशा




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य १४६ नूतनेषु सी.बी.एस.ई. सम्बद्ध-सर्वकारीयविद्यालयेषु शिक्षकाणां नियुक्तिं प्रति सुदीर्घकालात् चलन् गतिरोधः अधुना समाप्तः भविष्यति इति आशा वर्तते। शिक्षकाणां नियोजनस्य एषः विषयः अधुना २० जुलाई दिनाङ्के आयोज्यमानायां प्रदेशमन्त्रिमण्डलस्य उपवेशनं प्रति अन्तिमनिर्णयार्थं उपस्थापयिष्यते। अस्मात् पूर्वम् उप-मुख्यमन्त्रिणः मुकेश-अग्निहोत्रिणः अध्यक्षतायां निर्मितया मन्त्रिमण्डल-उपसमित्या स्वकीये उपवेशने योग्यताधारेण शिक्षकाणां नियुक्तये संस्तुतिः कृता अस्ति। अधुना अन्तिमः निर्णयः मन्त्रिमण्डलस्य स्वीकृतेः परं भविष्यति।

सर्वकारेण प्रदेशस्य १४६ सर्वकारीयविद्यालयान् सी.बी.एस.ई. संस्थानेन सम्बद्धं कर्तुं ५६२३ शिक्षकाणां नियोजनस्य निर्णयः गृहीतः आसीत्। एतदर्थं हिमाचलप्रदेश-स्कूल-शिक्षा-बोर्ड इत्यस्य माध्यमेन एका संवीक्षा-परीक्षा (स्क्रीनिंग टेस्ट) आयोजिता, यस्यां ९८२१ शिक्षकाः भागं गृहीतवन्तः ६०८४ शिक्षकाश्च योग्यतासूच्यां (मैरिट सूची) समाविष्टाः अभवन्। शिक्षाविभागेन योग्यताधारेण परामर्शस्य (काउंसलिंग) कार्यक्रमः अपि प्रसारितः आसीत्, परन्तु पश्चात् इयं प्रक्रिया स्थगिता जाता। तदनन्तरं एषः विषयः मन्त्रिमण्डल-उपसमितये (कैबिनेट सब-कमेटी) समर्पितः। उपसमित्या विस्तृतेन विचारविमर्शेन परं स्पष्टरूपेण योग्यताधारित-नियोजनस्य संस्तुतिः सर्वकाराय प्रेषिता अस्ति। अस्मिन्नेव अन्तरे सर्वकारेण सप्तानां मण्डलानां ६२ सी.बी.एस.ई. विद्यालयेषु प्रधानाचार्याणां नियोजनम् अपि योग्यताधारेण एव विहितम्, येन एषः सङ्केतः प्राप्तः यत् शिक्षकाणां नियुक्तौ अपि एषः एव नियमः स्वीकर्तुं शक्यते। यदि मन्त्रिमण्डल-उपसमित्याः संस्तुतिः स्वीक्रियते, तर्हि शिक्षाबोर्ड-इत्यस्य संवीक्षापरीक्षायाम् उत्तीर्णाः सहस्रशः शिक्षकाः सुदीर्घप्रतीक्षानन्तरं स्वकीयेषु प्रियविद्यालयेषु नियुक्तिं प्राप्तुं शक्ष्यन्ति। नूतन-शैक्षणिक-सत्रस्य मध्ये नियुक्तयः संजाते सति सी.बी.एस.ई. विद्यालयेषु अध्ययनम् अपि सुचारुरूपेण प्रचलति।

### शिक्षकाणां दृष्टयः अधुना मन्त्रिमण्डले

सी.बी.एस.ई. शिक्षकाः सुदीर्घकालात् योग्यताधारेण नियुक्तये याचनां कुर्वन्तः सन्ति। तेषाम् कथनम् अस्ति यत् पारदर्शिन्याः संवीक्षापरीक्षायाः निर्धारितायाः प्रक्रियायाश्च पूरणोत्तरं नियमेषु परिवर्तनम् उचितं न भविष्यति। शिक्षकसङ्घटनेभ्यः आशा वर्तते यत् सर्वकारः मन्त्रिमण्डल-उपसमित्याः संस्तुतिं स्वीकृत्य शीघ्रमेव नियुक्तिप्रक्रियाम् आरप्स्यते।

# एच.आर.टी.सी. निदेशकमण्डलस्य उपवेशनम्- हिमाचले शीघ्रमेव चत्वारः नूतनाः ई- आगाराः आरप्स्यन्ते, २९७ विद्युत्-बसयानानि धाविष्यन्ति



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे शीघ्रमेव चत्वारः नूतनाः ई-आगाराः (ई-डिपो) आरप्स्यन्ते। नादौन- हरोली- नाहन- ठियोग क्षेत्राणां सञ्चालनम् ई-डिपो रूपेण भविष्यति। प्रदेशे शीघ्रमेव २९७ नूतनानाम् विद्युत्- बसयानानां (इलेक्ट्रिकबस) सञ्चालनम् आरप्स्यते। नादौन, हरोली, ठियोग च एचआरटीसी-संस्थायाः त्रयः नूतनाः आगाराः निर्मास्यन्ते। नाहन-आगारः पूर्वमेव सञ्चालितः अस्ति। एतेषु चतुर्षु डिपो-क्षेत्रेषु केवलं ई-बसानाम् एव सञ्चालनं विधास्यते। गुरुवासरे एचआरटीसी-निदेशक-मण्डलस्य १६३ तमे उपवेशने एते निर्णयाः गृहीताः। उप- मुख्यमन्त्रिणः मुकेश अग्निहोत्रिणः अध्यक्षतायाम् आयोजिते उपवेशने ई-बसानां परीक्षणस्य सञ्चालनस्य च सज्जतानां समीक्षा कृता। उप- मुख्यमन्त्रिणा प्रतिपादितं यत् इलेक्ट्रिक-बसयानानां सञ्चालनेन सम्बद्धाः सर्वाः औपचारिकताः शीघ्रं पूरयिष्यन्ते। एताः प्रदेशवासिनां सेवायां समर्पयिष्यन्ते। उपवेशने निगमस्य सञ्चालने यात्रिसौकर्येषु च चर्चा संजाता। एचआरटीसी उपाध्यक्षः अजयवर्मा, निदेशक- मण्डलस्य सदस्याः वरिष्ठाः अधिकारिणश्च उपस्थिताः आसन्।

### यानचक्राणां अङ्गानां च न्यूनतायाम् असन्तोषः

उपमुख्यमन्त्रिणा निगमस्य बसयानेषु यानचक्राउ न्यूनतायाम् असन्तोषः प्रकटितः। तेन अधिकारिणः निर्दिष्टाः यत् भविष्ये बसयानानां सञ्चालनम् यानचक्राणां अथवा अन्येषाम् आवश्यक-यन्त्राङ्गानां (पुर्जो) अभावे प्रभावितं न भवेत्। तेन प्रोक्तं यत् आवश्यकीनां सामग्रीणां समये उपलब्धता सुनिश्चिता विधातव्या। वैकल्पिकप्रबन्धाः अपि पूर्वमेव करणीयाः। अनेन बसयानानां सञ्चालनम् अवरुद्धं न भविष्यति यात्रिभ्यश्च असौकर्यं (असुविधा) न जनिष्यते।

### विकृतानां ई-बसानां परिष्कारः शीघ्रमेव

एचआरटीसी-उपाध्यक्षेण अजयवर्मणा ज्ञापितं यत् शिमलाक्षेत्रे विकृतानां (खराब) ई-बसयानानां परिष्कारः (मरम्मत) शीघ्रं विधास्यते। 'पीएम ई बस' इति प्रदाता-कम्पनी-सह परिष्काराय सहमतिः निर्णयः विहितः अस्ति। कम्पनी विकृतानां बसानाम् अङ्गानि उपलब्धं कारयिष्यति। कम्पन्याः अभियन्तारः एव एतानि बसयानानि समीकरिष्यन्ति। ई-बसयानानां सञ्चालनस्य वृद्ध्या जनेभ्यः सौकर्यं (सुविधा) प्राप्स्यते।

# प्रधानमन्त्री विधास्यति 'अमृत भारत रेल स्थानकम् अम्ब-अन्दौरा इत्यस्य आभासीय- उद्घाटनम्, सांसदः अनुरागठाकुरः उपस्थितः भविष्यति




**हिमसंस्कृतवार्ताः- ऊना।** 'अमृत भारत स्टेशन' योजनायाः अन्तर्गतं विकसितस्य अम्ब-अन्दौरा रेल-स्थानकस्य उद्घाटनं १७ जुलाई दिनाङ्के अपराह्ने त्रिवादने प्रधानमन्त्री नरेन्द्रमोदी आभासीय-माध्यमेन विधास्यति। अस्मिन् अवसरे रेलवे-स्थानक-परिसरे आयोज्यमाने समारोहे हमीरपुर-संसदीयक्षेत्रस्य सांसदः पूर्व-केन्द्रीयमन्त्री च अनुरागठाकुरः मुख्यातिथिरूपेण सम्मिलितः भविष्यति। कार्यक्रमं ध्यात्वा रेलवे-प्रशासनेन सज्जाः प्रायः पूरिताः सन्ति। अमृत भारत स्टेशन योजनायाः अन्तर्गतम् अम्ब-अन्दौरा रेलस्थानकस्य व्यापकं आधुनिकीकरणं विहितम् अस्ति।स्टेशन-भवनस्य आधुनिकस्वरूपप्रदानेन सह यात्रिणां सौकर्याय अनेकाः नूतनाः व्यवस्थाः विकसिताः। परिसरः इतोऽपि स्वच्छः, व्यवस्थितः, यात्री- अनुकूलश्च कृतः, येन जनेभ्यः श्रेष्ठ- सुविधाभिः साकं रेलयात्रायाः अनुभवः प्राप्तुं शक्येत। प्रधानमन्त्री नरेन्द्रमोदी देशव्यापी- अमृत- भारत- स्टेशन-योजनायाः अन्तर्गतं विकसितानां विविध-रेल-स्थानकानाम् एकत्रैव आभासीय-उद्घाटनं विधास्यति। अस्यामेव शृङ्खलायां हिमाचलस्य प्रमुख-रेल-स्थानकेषु परिगणितम् अम्ब-अन्दौरा रेलवे-स्थानकम् अपि राष्ट्राय समर्पितं करिष्यते।

### उत्तर-भारतस्य महत्त्वपूर्णं रेल-सम्पर्क-केन्द्रम्

अम्ब-अन्दौरा रेलस्थानकम् उत्तर भारतस्य महत्त्वपूर्णेषु रेलस्थानकेषु परिगण्यते। एतत् ऊना, हमीरपुर, काङ्गड़ा सहितं परितः क्षेत्राणां लक्षशः यात्रिणां कृते प्रमुखं रेल-सम्पर्क-केन्द्रं (रेल कनेक्टिविटी हब) वर्तते। स्थानकस्य आधुनिकस्वरूपेण विकासात् यात्रिभ्यः श्रेष्ठ-प्रतीक्षालयाः, सुगमा आवागमनम्, स्वच्छं वातावरणम्, उन्नतानां यात्री-सुविधानां च लाभः उपलप्स्यते। रेलवेप्रशासनेन ज्ञापितं यत् कार्यक्रमस्य साफल्येन सम्पादनाय सर्वाः आवश्यकाः व्यवस्थाः सुनिश्चिताः क्रियन्ते। स्टेशन- परिसरः आकर्षकरूपेण सज्जीक्रियते, तत्रैव सुरक्षा-यातायात-व्यवस्थायै अपि विशेषाः प्रबन्धाः विहिताः सन्ति। अस्मिन् ऐतिहासिके अवसरे क्षेत्रस्य जनेषु अत्यधिकः उत्साहः दृश्यते।

# भारतस्य प्रथमस्य निजी-कक्षा-रॉकेट् ‘विक्रम-१’ इत्यस्य परीक्षण-प्रक्षेपणम् अद्य भविष्यति; ‘मिशन आगमन’ इत्यस्य सज्जता पूर्णा

भारतस्य अन्तरिक्षक्षेत्रे निजीभागिदारितायाः नूतनयुगस्य आरम्भं कुर्वन्, देशस्य प्रथमस्य निजीरूपेण विकसितस्य कक्षीय-श्रेण्याः (ऑर्बिटल श्रेणी) रॉकेट्-यानस्य ‘विक्रम-१’ इत्यस्य प्रथमं परीक्षणप्रक्षेपणं ‘मिशन आगमन’ इत्यन्तर्गतं जुलै-मासस्य १८ दिनाङ्के श्रीहरिकोटास्थितात् सतीशधवनअन्तरिक्षकेन्द्रात् भविष्यति। भारतीयअन्तरिक्षअनुसन्धानसङ्गठनस्य (इसरो) सूत्रैः ज्ञातं यत् हैदराबाद-नगरस्य निजीअन्तरिक्षसंस्थया ‘स्काईरूट एयरोस्पेस’ इत्यनया विकसितस्य अस्य रॉकेट्-यानस्य प्रक्षेपणं प्रथमप्रक्षेपणपरिसरतः (फर्स्ट लॉन्च पैड) प्रातः ११:३० वादने करिष्यते। एतत् रॉकेट्-यानं ६० डिग्री-कोणेन सह ४५० किलोमीटर उन्नतौ निम्न-पृथिवी-कक्षायां (LEO) स्थापितं भविष्यति।अस्मिन् रॉकेट्-याने देश-विदेशयोः संस्थानां बहवः प्रौद्योगिक-प्रदर्शन-पेलोड्स् (टेक्नोलॉजी डेमॉन्स्ट्रेशन पेलोड) प्रेषयिष्यन्ते। एतेषु तेलङ्गानाराज्यस्य कलाकारेण अजयकुमारमट्टेवाडा-महोदयेन निर्मितं १८ कैरेट्-स्वर्णस्य एकं सूक्ष्मरॉकेट् अपि सम्मिलितम् अस्ति, यस्मिन् नोबेल्-पुरस्कारविजेतुः सर् सी.वी. रमणस्य, भारतीयअन्तरिक्षकार्यक्रमस्य जनकस्य डा. विक्रमसाराभाई-महोदयस्य तथा पूर्वराष्ट्रपतेः प्रख्यातवैज्ञानिकस्य डा. ए.पी.जे. अब्दुलकलामस्य च सूक्ष्मप्रतिमाः अङ्किताः सन्ति। एतासां प्रतिमानाम आकारः तण्डुलकणाद् अपि लघुः अस्ति।

# अखिल भारतीय आयुर्विज्ञान संस्थाने (एम्स) बिलासपुर इत्यत्र वरिष्ठचिकित्साकानां (सीनियर रेजिडेंट) ७० पदानि पूरयिष्यन्ते, २१ जुलाई दिनाङ्के भविष्यति नियुक्तिप्रक्रिया



हिमसंस्कृतवार्ताः- बिलासपुरम्।अखिलभारतीय-आयुर्विज्ञान- संस्थाने (एम्स) बिलासपुर इत्यत्र वरिष्ठचिकित्साकानां (सीनियर रेजिडेंट) ७० रिक्तपदानि पूरयिष्यन्ते। एतदर्थं २१ जुलाई दिनाङ्के नियुक्तिप्रक्रिया आयोजयिष्यते। एतेषु ४३ पदानि व्यापकविशेषज्ञतायाः (ब्रॉड स्पेशलिटी) तथा २७ पदानि उच्चविशेषज्ञतायाः पूरयिष्यन्ते। व्यापकविशेषज्ञतायां १० पदानि निश्चेतनविज्ञानस्य (एनेस्थीसिया) सन्ति। एतदतिरिच्य रेडियोडायग्नोसिस/ रेडियोलॉजी, आघात-आपत्कालीनविभागे (ट्रॉमा एवं इमरजेंसी) च पञ्च-पञ्च पदानि, बालरोगे (पीडियाट्रिक्स) त्रीणि पदानि, सामान्यभेषजे (जनरल मेडिसिन), सूक्ष्मजीवविज्ञाने (माइक्रो- बायोलॉजी), नाभिकीयभेषजे (न्यूक्लियर मेडिसिन), प्रसूति-स्त्रीरोगे (गायनोकोलॉजी) विकृतिविज्ञाने (पैथोलॉजी) च द्वे-द्वे पदे रिक्ते स्तः। तत्रैव शारीरविज्ञाने (एनाटॉमी), जैवरासायनविज्ञाने (बायोकेमिस्ट्री), सीएमएफ, चर्मरोगे (डर्मेटोलॉजी), सामान्यशल्यचिकित्सायां (जनरल सर्जरी), चिकित्सालयप्रशासने (हॉस्पिटल एडमिनिस्ट्रेशन), भौतिकभेषज-पुनर्वासे (फिजिकल मेडिसिन एवं पुनर्वास), शारीरक्रियाविज्ञाने (फिजियोलॉजी), विकिरणचिकित्सायां (रेडियोथैरेपी), रक्तसञ्चार-रक्तकोषे (ट्रांसफ्यूजन मेडिसिन एवं ब्लड बैंक) च एकैकं पदं पूरयिष्यते।

उच्चविशेषज्ञतायाः २७ पदेषु हृदयरोगविज्ञाने (कार्डियोलॉजी), हृदय- वक्ष- रक्तवाहिनी-शल्यचिकित्सायां (सीटीवीएस), गहनचिकित्सायां (क्रिटिकल केयर), अर्बुदभेषजे (मेडिकल ऑन्कोलॉजी), वृक्कतन्त्रविज्ञाने (नेफ्रोलॉजी), तन्त्रिकाविज्ञाने (न्यूरोलॉजी), बालशल्यचिकित्सायां (पीडियाट्रिक सर्जरी), फुफ्फुसभेषजे (पल्मोनरी मेडिसिन), शल्य- अर्बुदविज्ञाने (सर्जिकल ऑन्कोलॉजी) मूत्रतन्त्रविज्ञाने (यूरोलॉजी) च द्वे-द्वे पदे स्तः। अपि च, दग्ध-प्लास्टिकशल्यचिकित्सायां (बर्न्स एवं प्लास्टिक सर्जरी), अन्तःस्रावीविज्ञाने (एंडोक्रिनोलॉजी), स्त्री- अर्बुदविज्ञाने (गायने ऑन्कोलॉजी), नवजातरोगविज्ञाने (नियोनेटोलॉजी), तन्त्रिकाशल्यचिकित्सायां (न्यूरोसर्जरी), बालगहनचिकित्सायां (पीडियाट्रिक क्रिटिकल केयर) सन्धिवात- नैदानिक- प्रतिरक्षणाविज्ञाने (रूमेटोलॉजी एवं क्लिनिकल इम्यूनोलॉजी) च एकैकं पदं पूरयिष्यते।

## अनलाइन-आवेदनस्य आवश्यकता नास्ति, साक्षात् साक्षात्कारे सम्भवेयुः

इच्छुक- अभ्यर्थिभ्यः कस्यापि प्रकारस्य अनलाइन-आवेदनं कर्तुम् आवश्यकता न भविष्यति। ते निर्धारित-आवेदनपत्रेण आवश्यक- दस्तावेजैः च सह साक्षात् साक्षात्कारे भागं ग्रहीतुं शक्ष्यन्ति। एम्स संस्थानेन प्रसारितेन विज्ञापनेनुसारं अभ्यर्थिभिः प्रातः ९ वादनपर्यन्तं उपस्थितव्यं भविष्यति। प्रातः १० वादनात् परं आगच्छन्तः अभ्यर्थिनः साक्षात्कारे न प्रवेशयिष्यन्ते। चयनं दस्तावेजानां सत्यापनेन साक्षात्कारेण च भविष्यति। सम्बद्धे विषये एम.डी., एम.एस., डी. एन. बी., डी.एम., एम.सीएच. वा समानां योग्यतां धारयन्तः अभ्यर्थिनः आवेदनार्थं योग्याः भविष्यन्ति। केषुचित् विभागेषु निर्धारित-योग्यतायुक्ताः गैर-चिकित्सा-अभ्यर्थिनः अपि आवेदनं कर्तुं शक्ष्यन्ति।

## ४५ वर्षदेशीयाः आवेदितुं शक्नुवन्ति

अधिकतमा आयुसीमा ४५ वर्षाणि निर्धारिता अस्ति। आरक्षितवर्गेभ्यः केन्द्रसर्वकारस्य नियमानुसारं आयुसीमायां छूटं (शिथिलता) प्राप्स्यते। सामान्य-ओबीसी-ईडब्ल्यूएस-वर्गाणां अभ्यर्थिभिः १००० रूप्यकाणि आवेदनशुल्कं दातव्यं भविष्यति। अनुसूचितजाति- जनजाति- दिव्याङ्ग- अभ्यर्थिभ्यः आवेदनशुल्कात् मुक्तिः दत्ता अस्ति। अभ्यर्थिभिः साक्षात्कारसमये आवेदनपत्रेण सह सर्वाणि मूलप्रमाणपत्राणि तेषां स्वप्रमाणितप्रतिलिपयः च प्रस्तोतव्याः भविष्यन्ति।

# तिरुपतिमन्दिरे दानस्य नूतनः कीर्तिमानः; एकेनैव दिनेन १७ कोटिरूप्यकाणां समर्पणम्



हिमसंस्कृतवार्ता। तिरुमाला तिरुपति देवस्थानम् (टीटीडी) इत्यनेन श्रद्धा-दानयोः क्षेत्रे नवीनः इतिहासः रचितः। तिरुमलायां स्थितस्य विश्वप्रसिद्धस्य तिरुपति बालाजी मन्दिरस्य नूतना 'दाता-नीतिः' (डोनर पॉलिसी) प्रवृत्ता भवितुं प्रागेव दानकर्तॄणां संमर्दमहान् अभवत्। मन्दिरप्रशासनेन एकेनैव दिने सर्वाधिकं दानं प्राप्य नूतनः अभिलेखः (रेकॉर्ड) स्थापितः। मङ्गलवासरे दर्शनसौविध्ये संशोधनस्य घोषणानन्तरं विश्वस्य विभिन्नभागेभ्यः २४६० भक्ताः प्रायः १७ कोटिरूप्यकाणां (१७ करोड) दानं कृत्वा नूतनं कीर्तिमानं स्थापितवन्तः।टीटीडी ट्रस्ट बोर्ड इत्यनेन मङ्गलवासरे मध्यरात्रितः दानदातृभ्यः प्रदीयमानेषु विशिष्टदर्शनसौविध्येषु कस्यचन परिवर्तनस्य घोषणा कृता आसीत्। एतस्मात् कारणात् भक्तेषु वर्तमानानां सुविधानां रक्षणार्थं निश्चितसमयात् पूर्वमेव दानं कर्तुं स्पर्धा प्रवृत्ता। प्रशासनेन स्पष्टीकृतं यत् ये भक्ताः निर्धारितसमयावधेः पूर्वं स्वकीयं दानं पूर्णं करिष्यन्ति, ते पूर्ववत् विशेषसुविधाः प्राप्नुवन्तः स्थास्यन्ति। टीटीडी संस्थायाः अध्यक्षेण बी.आर. नायडु महोदयेन उक्तं यत् ट्रस्ट् इत्यनेन एकेनैव दिने दानस्य आहृत्य राशौ तथा च दानकर्तॄणां संख्यायां, उभयोः विषययोः नूतनः कीर्तिमानः स्थापितः अस्ति। २४६० भक्तानां दानसमर्पणम्; द्वाभ्यां भक्ताभ्याम् एकैककोटिरूप्यकाणां राशिः प्रदत्ता

विवरणानुसारम्, मङ्गलवासरे आहत्य २४६० भक्ताः मन्दिराय दानं समर्पितवन्तः। एतेषु १२१२ जनाः एकलक्षतः दशलक्षरूप्यकाणां (१-१० लाख) मध्ये दानं कृतवन्तः, तथा च १२४६ भक्ताः दशलक्षतः पञ्चविंशतिलक्षरूप्यकाणां (१०-२५ लाख) पर्यन्तं राशिं दानरूपेण दत्तवन्तः। एतदतिरिच्य द्वाभ्यां भक्ताभ्याम् एककोटिरूप्यकात् (१ करोड) अपि अधिका धनराशिः मन्दिरे अर्पिता।

# उन्नत-मूलभूत संरचना सर्वदैव एकस्याः विकसित-सभ्यतायाः मुख्यं लक्षणं मन्यते राजनाथसिंहः



हिमसंस्कृतवार्ता। भारतस्य रक्षा-मन्त्री राजनाथसिंहः सविशेषं प्रख्यापितवान् यत् प्रशासनस्य अयं श्लाघनीयो प्रयासो वर्तते यत् तादृशस्य नूतन-भारतस्य निर्माणं भवेत्, यत्र राष्ट्रस्य सीमाः न केवलं सुरक्षिताः स्युः, अपितु ताः सुदूर क्षेत्रैः सह सर्वोत्कृष्ट-सम्पर्क-तन्त्रेण अपि संयोजिताः स्युः। तेन स्पष्टीकृतं यत् प्रशासनं विकासं राष्ट्रिय सुरक्षां च एकेन एव मार्गेण सहसा अग्रे नेतुं दृढ-सङ्कल्पबद्धम् अस्ति।

नवदेहल्यां सीमा-मार्ग-सङ्गटनस्य प्रौद्योगिकीय-सङ्गोष्ठ्याः महनीयं मञ्चं सम्बोधयन् श्रीसिंहेन प्रोक्तं यत् उन्नत-मूलभूत संरचना सर्वदैव एकस्याः विकसित-सभ्यतायाः मुख्यं लक्षणं मन्यते। तेन सबलं प्रोक्तं यत् अद्य या मूल-संरचना देशे निर्मीयते, सैव आगामिषु वर्षेषु भारत-सभ्यतायाः नूतनं स्वरूपं परिभाषिष्यति। रक्षा-मन्त्रिणा दृढं व्याहृतं यत् प्रशासनस्य अन्तिमं लक्ष्यम् इदमेव अस्ति यत् देशस्य कस्मिन्नपि अति-दुर्गमे सुदूरे वा क्षेत्रे निवसमानः कश्चिदपि नागरिकः राष्ट्रस्य मुख्यधारातः विच्छिन्नः कदापि न अनुभवेत्।

# लोकसभासनानां वृद्धिविधेयकम् सर्वदलीयवैठकस्य आह्वानाय

### मल्लिकार्जुनखडगेमहोदस्य प्रेषितं प्रधानमन्त्रिणे पत्रम्

लोकसभासंसदीयक्षेत्राणां परिसीमनमाध्यमेन आसनानां सङ्ख्यावर्धनस्य विधेयकं संसदि पुनः आनेतुं प्रवृत्तासु चर्चासु, काङ्ग्रेस-अध्यक्षेण मल्लिकार्जुनखडगेमहोदस्य प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति पत्रं लिखित्वा अस्मिन् विषये चर्चार्थं सर्वदलीयोपवेशनम् आह्वातुं याचना कृता। श्रीखडगेमहोदनेन गुरुवासरे लिखिते अस्मिन् पत्रे उक्तं यत् तेन मार्च-अप्रैल-मासयोः संसदीयकार्यमन्त्रिणं किरेन रिजिजू-महोदयं प्रति पत्रं लिखित्वा परिसीमनसम्बन्धि सर्वकारस्य प्रस्तावेषु सर्वदलीयबैठकस्य आयोजनार्थम् अनुरोधः कृतः आसीत्, परन्तु ततः किमपि सकारात्मकम् उत्तरं न प्राप्तम्। काङ्ग्रेस-अध्यक्षेण उक्तं यत् परिसीमनार्थं समानीतं 'संविधानं (१३१तमं संशोधनम्) विधेयकं २०२६' अप्रैल-मासस्य १७ दिनाङ्के लोकसभायां आवश्यकं द्वितीयांशं बहुमतं प्राप्तुं न शक्नोत्।




# अथ विवाहपात्रतापरीक्षा

*(Marriage Eligibility Test)*

प्राप्तुं राजकृतां नियुक्तिमधुना विद्यावतोऽपि ध्रुवं
वर्षाण्येव तपस्यतीव मनुजो धृत्वा धृतिं नित्यशः।
उत्तीर्णो बहुपत्रिकापरिकथाजालाद्बुधैः पूज्यते
सेवायोग्यतया नु मीयत इयं वैवाहिकी पात्रता॥१॥

दिष्ट्या चेल्लभते पदं स मनुजः स्वर्गाधिकारं यथा
लोके गौरवकङ्कणैः प्रमुदितः सत्कारमानं लभेत्।
नो चेद्भाग्यवशाद् व्रजेद्विफलतां हा कष्टमश्रुद्रुतं
मूल्यं तस्य जनस्य शून्यवदहो पृथ्वीतले जायते॥२॥

विद्याशीलकुलं तथैव विनयं स्वास्थ्यं स्वभावं गुणान्
हित्वा कर्म मतिं च केवलमहो सेवापदं पश्यति।
कन्यापक्षजनोऽधुना ननु वरं निर्धारयन्नुत्सुकः
सेवायोग्यतया नु मीयत इयं वैवाहिकी पात्रता॥३॥

धन्यः सोऽपि न केवलं धनपदप्राप्त्या गृही पूज्यते
स्नेहाचारविचारशीलहृदयः कर्तव्यनिष्ठो भवेत्।
एतैरेव गुणैरलङ्कृततनुर्वैवाहिकं जीवनं
सेवायोग्यतया नु मीयत इयं वैवाहिकी पात्रता॥४॥

सन्त्वन्ये बहवो गुणाः सुविदिता विद्या विनीतिः शमः
सत्यं सद्व्यवहारता परहिते नित्यं रतिः सर्वदा।
सेवाहीन इति त्यजत्यभिमतं तं लोकवृत्तिर्ध्रुवं
सेवायोग्यतया नु मीयत इयं वैवाहिकी पात्रता॥५॥

पूर्वं प्रेमसुगन्धिपुष्पनिकरैः सन्देशपत्रं प्रियम्
प्रेष्य प्रेममयीं दशां कथयति स्मानन्दबाष्पाकुलम्।
अद्य त्वस्य नियुक्तिपत्रमधिकं हर्षस्य हेतुर्भवेत्
सेवायोग्यतया नु मीयत इयं वैवाहिकी पात्रता॥६॥

पूर्वं प्रेमकथां निशम्य तरुणं प्रत्याख्य वाक्यैः कटुं
कन्यायाः पितरौ बभूवतुरलं क्रोधेन निःसंश्रयौ।
दृष्ट्वा तं तु नियुक्तिपत्रसहितं सानन्दमभ्यागतौ
सेवायोग्यतया नु मीयत इयं वैवाहिकी पात्रता॥७॥

©रचयिता-वत्सदेशराजशर्मा
संस्थापकाध्यक्षोवैदिकगणः भारतम्

# फीफा-विश्वकप-उपान्त्यक्रीडा: अर्जेन्टीना-देशेन इङ्ग्लैण्डं २-१ इत्यनेन पराजित्य अन्तिमचरणे (फाइनल) प्रवेशः प्राप्तः

अटलांटा। वर्तमानविजेत्रा अर्जेन्टीना-देशेन फीफा-विश्वकपस्य उपान्त्यचक्रे (सेमीफाइनल) अन्तिमक्षणेषु प्रत्यावर्तनं कुर्वन् इङ्ग्लैण्डदेशं २-१ इत्यनेन अन्तरेण पराजित्य रविवासरे स्पेन-देशेन सह भवितुं योग्यायां प्रवरक्रीडायां स्वस्थानं सुरक्षितं कृतम्। मर्सिडीज-बेंज-क्रीडाङ्गणे बुधवासरे रात्रौ अनुष्ठिते अस्मिन् द्वन्द्वे ५५ तमे निमेषे (मिनट) एंथनी गॉर्डन महोदयस्य गोल्-प्रहारेण इङ्ग्लैण्डदेशः विजयमार्गं प्रति गच्छन् दृश्यते स्म, परन्तु अर्जेन्टीना-देशेन क्रीडायाः अन्तिमक्षणेषु पक्षं परिवर्तितम्। एन्जो फर्नांडीज महोदयेन क्रीडासमाप्तेः पञ्चनिमेषपूर्वं गोलं कृत्वा अङ्काः समानाः कृताः, ततः परं विकल्पक्रीडकरूपेण (सब्स्टीट्यूट) आगत्य लौटारो मार्टिनेज महोदयेन द्वितीयभागस्य अतिरिक्तसमये (स्टॉपेज टाइम) लियोनेल मेसी महोदयस्य क्रॉस-पास उपरि हेडर-माध्यमेन विजयगोलं प्रहृतम्।उभाभ्यां दलाभ्यां क्रीडायाः प्रथमार्धं अतीव सावधानतया क्रीडितम्, अस्मिन् समये उभावपि दलौ आत्मरक्षणं कुर्वन्तौ दृश्येताम् तथा च कस्यापि कृते अवसराः न्यूनाः एव आसन्। इङ्ग्लैण्डदेशेन अनुशासितं रक्षात्मकं प्रदर्शनं (डिफेंस) कृतम्, अपरतः अर्जेन्टीना-देशेन कन्दुकः स्ववशं रक्षितः, किन्तु ते इङ्ग्लैण्डस्य गोलरक्षकं जॉर्डन पिकफोर्ड महोदयं विशेषपीडां दातुं न शक्नुवन्। प्रथमार्धं गोलरहितम् आसीत्। क्रीडायाः प्रथमं गोलं द्वितीयभागस्य १० तमे निमेषे अभवत्, यदा मॉर्गन रोजर्स महोदयेन दक्षिणभागतः अचूकः क्रॉस-पास दत्तः, गॉर्डन महोदयेन च समीपतः गोलं कृत्वा इङ्ग्लैण्डदेशाय महत्त्वपूर्णा अग्रता प्रापिता।





हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ५८ (महापुरुषस्मरणम्)

परम्परया अस्यां वसुधायां नैके महापुरुषाः, सद्ग्रन्थविरचकाः च आविर्भूताः। एतेषु भगवान् श्रीव्यासदेवः अन्यतमः। लेखेऽस्मिन् अस्य महाभागवतस्य गुणानुकीर्तनं विधातुं यथाज्ञानमत्र प्रयत्यते।
महर्षि-वशिष्ठस्य शतं पुत्राः, तेषु ज्येष्ठः शक्ति नामधेयः। शक्तिः कस्मादपि कारणात् राजानं कल्माषपादम् अभिशप्तवान् यत् भवान् राक्षसः भवतु इति। स हि कल्माषपादः तेषां महाकालः सञ्जातः, शक्तिना सहः वशिष्ठमुनेः शतं पुत्रान् सः भक्षितवान्। पुत्रवियोगम् असहमानः शोकसंतप्तः वशिष्ठमुनिः सरस्वतीनदीं पतित्वा आत्महत्यार्थं सन्नद्धः जातः चेदपि सरस्वतीदेवी साक्षात् प्रकटीभूय तं रक्षितवती। वंशनाशदुःखात् स मर्तुम् इच्छति स्म, परन्तु शक्तिपत्नी अदृश्यस्ती गर्भवती अस्तीति ज्ञात्वा शोकम् अत्यजत्। यथासमयम् अदृश्यस्ती एकं पुत्रसन्तानं प्रसूतवती। तस्यनाम पराशरः इति जातम्। कालक्रमे अयं मन्त्रद्रष्टा जातः। म्रियमाणाय वशिष्ठाय सः पुनर्जीवनं दत्तवान् इत्यतः तस्य नाम 'पराशरः' इति। वशिष्ठमुनिः सयत्नं तस्य पालन-पोषणं कृतवान्।
एकदा पराशरः मातुः पुरस्तात् हि पितामहं वशिष्ठं 'पितः!' इति सम्बोधितवान्। तदा तस्य जननी तं ज्ञापितवती यत् अयं भवतः पितामहः हि, न वा पिता इति। अनन्तरं सः मातृमुखात् ज्ञातवान् यत् तत्पितरं एकः राक्षसः भक्षितवान् इति। तज्ज्ञात्वा सः क्रोधेन उत्तुङ्गतां गतः। वशिष्ठः तं समाश्वास्य तस्मै धैर्यं प्रदत्तवान्। तथापि सः तस्य राक्षसस्य नाशार्थं राक्षसयज्ञं सम्पादितवान्, तस्य यज्ञस्य पुरोहितः पुलस्त्यमुनिः आसीत्।
एकदा पराशरः यमुनानदीम् उपस्थाय नदीं तरीतुम् ऐच्छत्, विशेषकार्यार्थम्। तदा एका धीवरपुत्री मत्स्यगन्धा नौकया ऋषिम् अपरतीरं प्रापयितुम् उत्सुका जाता। ऋषिः नौकाम् आरूढवान्। गमनसमये ऋषिः धीवरपुत्रीरूपे मुग्धः जातः, गान्धर्वप्रथानुसारं तां परिणीतवान् अपि। तपोबलेन ऋषिः नदीमध्ये हि एकं द्वीपं सृष्ट्वा तत्रैव मत्स्यगन्धया सह रमणं कृतवान्। सा ऋषिवरदानेन मत्स्यगन्धातः पद्मगन्धा जाता, सत्यवती इति नाम्ना सा प्रसिद्धा अभवत्।
गच्छता कालेन सा एकं पुत्ररत्नं प्रसूतवती। तस्य शिशोः शरीरं श्यामवर्णीयम् आसीत्, अतः 'कृष्णः' इति तस्य नाम जातम्। द्वीपे जन्म इत्यतः तस्य अपरनाम 'द्वैपायनः' इति नाम्ना ख्यातः अभवत् सः। तेन वेदस्य विभाजनं कृतम्, अतः अन्यत् नाम 'वेदव्यासः' इति। शास्त्रानुसारं सः भगवतः नारायणस्य अंशावतारः वर्तते। भारतीयम् ऐतिह्यम्, परम्परागता साहित्य-संस्कृतिः इत्यादिषु वेदव्यासस्य अतुलनीयम् अवदानं वर्तते। पूर्वं वेदः एकः हि आसीत्, कलिकालस्य उपक्रमम् अभिज्ञाय तेन वेदः चतुर्षु भागेषु विभाजितः। ते ऋक्, यजुः, सामः, अथर्वः चेति। इतिहासः एवं पुराणसमूहः पञ्चमवेदत्वेन स्वीक्रियते। महाभारत नामकं महाकाव्यमपि तस्यैव कृतिर्वर्तते। एवमेव श्रीमद्भागवतं वेदव्यासस्य अमरकृतित्वेन लोके राजमानम् अस्ति। तस्य अपरनाम 'बादरायणः' इति। तेन वेदान्तग्रन्थः विरचितः। प्रस्थानत्रयम् इत्युक्ते उपनिषत्, भगवद्गीता, वेदान्तसूत्रं चेति, यस्य स्रष्टा भगवान् वेदव्यासः आख्यायते। व्यासोच्छिष्टं जगत्सर्वम् इति, शुभमस्तु।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम

# लौकिकन्यायकोशः कूटकार्षापणन्यायः

कूट इति कृत्रिमस्य द्रव्यस्य नाम। कार्षापणमिति नाणकम्। केनापि कूटानां नाणकानां विनिमयेन द्रव्यमर्जितं तर्हि तत् ग्रहणीयं भवति। सहसैव तत् परिहरणीयं भवति। तथैव यदि काचित् स्मृतिः श्रुतिविरुद्धं किमपि प्रतिपादयेत् तर्हि तत् सहसैव त्याज्यम् इति न्यायेन बोध्यते। पश्यन्तु-
"शब्दापभ्रंशवदेव गौणभ्रान्त्यादिप्रयोगनिमित्ता अर्थापभ्रंशा भवन्ति ते शास्त्रस्थैरेव अविप्लुतार्थं क्रियानिमित्तपुण्यर्षिभि शक्यन्ते, साध्वसाधुकार्षापणमध्यादिव तत्परीक्षिभिर्विवेक्तुम् "।। - (तन्त्रवार्तिकम् १-३-८)



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ताकार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य अमेरिकादेशे कश्चित् जनः मार्जारशावकं चोरितवान् अस्ति। ततः तेन सः मार्जारशावकः धनकोश-रक्षकस्य हस्ते समर्पितः येन वित्तकोशस्य लुण्ठनं भवेत्।
**काव्या-** नमस्ते नन्दिनि। मार्जारसाहाय्येन वित्तकोशस्य लुण्ठनप्रयासः अतीव विचित्रः अस्ति! अस्तु, अन्यस्मिन् देशे एकेन विमानचालकेन गगने विमान-मार्गस्य साहाय्येन "मया खिद्यते" इति लिखितम्। सः द्विघण्टात्मकं परीक्षणविमानं चालयन् आसीत्।
**नन्दिनी-** विरक्तस्य विमानचालकस्य गगन-लेखनं मया ज्ञातम्, हास्यकरं च एतत्। इदानीं क्रीडाजगतः वार्ता। पेरुदेशे क्रीडकेन प्रभावितैः पञ्चशताधिकैः मातापितृभिः स्वशिशूनां कृते "हालन्दः" इति नामकरणं कृतम्।
**काव्या-** सुन्दरी क्रीडाभक्तिः शिशुभिः प्राप्ता! अस्तु, तन्त्रज्ञानक्षेत्रे अपि एका विचित्रा घटना घटिता। अतलान्तानगरे अनेकानि चालकरहितानि स्वचालितवाहनानि मार्गान्तभागे एकत्र सङ्गृहीतानि। तेन मार्गे महान् कोलाहलः उत्पन्नः।
**नन्दिनी-** यन्त्राणां कोलाहलः मनुष्येभ्यः क्लेशदायकः एव अस्ति। अद्यतनकार्यक्रमः समाप्तः। श्वः पुनः मेलिष्यामः। धन्यवादः।